वर्ष 4 अंक 14 जनवरी-मार्च 2018

ISSN 2394-5540

अनुरंजिका

ANURANJIKA

अन्ताराष्ट्रिय त्रयमासिक शोध पत्रिका

AN INTERNATIONAL REASERCH REFEREED JOURNAL

प्रधानसम्पादक

डॉ. उमाशंकर चतुर्वेदी 'कंचन'

संस्कृति प्रकाशन, वाराणसी

ISSN 2394-5540

13	अद्वैतनये जीवपरिमाणविचारः डॉ. प्रांगेशकुमारमिश्रः	51-56
14	भ्रष्टाचारोन्मूलने संस्कृतस्य योगदानम् डॉ. शीलेन्द्र कुमार पाठक	57-58
15	सांख्यमतानुसारेण प्रकृतिनिरूपणम् डॉ. रवीन्द्र कुमार पाठक	59-60
16	अथर्ववेद में काम देवता : एक विवेचन रमाशंकर प्रसाद	61-63
17	व्याकरणस्य महत्त्वम् नीरज शर्मा	64-66
18	व्याकरणशास्त्रशिक्षणविधयः मंजु कुमारी	67-74
19	प्राचीन भारत में खगोल विज्ञान - ऐतिहासिक अवलोकन प्रियंका गुप्ता	75-78
20	वर्तमान परिवेश में योग की प्रासंगिकता विवेक जायसवाल	79-84
21	सा प्रथमा संस्कृतिर्विश्ववारा डॉ0 सुखदेव वाजपेयी	85-88
22	केनेषितं पतति प्रेषितं मनः डॉ० किरण आर्या	89-91
23	अधिकरणकारकविमर्शः जयन्तकुमारचौधरी	92-97
24	[illegible] में भावों का मानवीकरण - डॉ0 शिवशंकर यादव	98-100
25	श्रीमद्भागवतस्यैव महापुराणत्वम् उद्धवशरण मिश्र	101-103
26	कुमारसम्भवे सौन्दर्यम् लोकेश कुमार सिंह	104-106
27	आधुनिकसन्दर्भे भुवनकोशविमर्शः डा0 भास्करशुक्लः	107-109
28	प्राचीन भारत में राज्य और उसका शासन कौटिल्य के सन्दर्भ डा0 संजय कुमार सिंह	110-113

केनेषितं पतति प्रेषितं मनः

ISSN 2394-5540

डॉ० किरण आर्या
असि० प्रोफेसर संस्कृत
हरिसिंह गौर वि० वि० सागर

मन ज्ञाने, मनु अवबोधने, मन स्तम्भे एभित्रिभिः धातुभिः सर्वधातुभ्योऽसुन् इत्युणादिसूत्रेण असुन्प्रत्यये कृते 'मनस् ' इति शब्दस्सिध्यति । मन्यते, ज्ञायते, अवबुध्यते तन्मनः । स्तम्भीक्रियते, वशीक्रियते यत्तन्मनः । मनस्तत्त्वमेतत् तत्तत्त्वं विद्यते तत्त्वविद्भिर्यत्तत्त्वं वेदयितुम् उपनिषद्वेदादिषु बहुधा विचिन्तितम् । प्रतिशरीरे विद्यमानमिदं मनः अन्नाज्जायते -''तन्मनोऽन्नमयम'' (६/८/१) इति छान्दोग्योनिषदे प्रमाणम् । अन्नाज्जायमानत्वात् यादृशमन्नम्भुज्यते तादृगेव मनः संजायते, तेन च मनसा तादृगेव कर्माकर्म विधीयते मनुजैः । प्रतिदेहं विद्यमानं निवसदपि इदम्मनः जाग्रतो दूरमुदैति, सुप्तस्य च दूरमुदैति, तद्दूरात् दुरंमनं मनः केवलं तपस्विभिः महात्मभिः योगिभिः वशीक्रियते, तच्चापि महत्काठिन्येन । सुदूरे अतिदूरे च गते सत्यपि अनेनैव मनसा सर्वाणि कार्याणि कर्माणि च क्रियन्ते इति महदाश्चर्यम् । यथोपनिषद् उक्तम् -

मनुष्यः मनसा पश्यति, मनसा शृणोति, कामः संकल्पः विचिकित्सा श्रद्धा, अश्रद्धा सर्वं मनसा भवति [1]

अपि च-

''यन्मनसा ध्यायति तद्वाचा वदति, यद्वावचा वदति तत्कर्मणा करोति, यत्कर्मणा करोति तदभिसम्पद्यते । अनेन स्पष्टम् यत् अस्माभिः सर्वाः क्रिया मनसैव विधीयन्ते । आत्मनः प्रेरणां, वाचे प्रापयितुं मन इति साधकम् करणम् । यथा प्रग्रहं विना अश्वोपरि स्थितिः पतनकारणम् , गन्तव्यस्थानापन्नमसम्भवम् तथैव मनः विना शरीरगतिः । आत्मा शरीररथे आरूह्य मनोरूपं प्रग्रहं प्रग्रह्य एव जीवनयात्रां करोति । यथा उवाच उपनिषद्ऋषिः-

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ।।

एवञ्च मनसा एव सर्वे पारस्परिक-व्यवहारान् विचारान् अनुभवांश्च ज्ञातुं योग्याः भवन्ति । सर्वाणि इन्द्रियाणि मनसा संयज्य एव स्वविषयेष प्रवृताः दरीदृश्यन्ते । ऋते मनसः एकमपीन्द्रिय एवञ्च मनसा एव सर्वे पारस्परिक-व्यवहारान् विचारान् अनुभववांश्च ज्ञातुं योग्याः भवन्ति । सर्वाणि इन्द्रियाणि मनसा संयुज्य एव स्वविषयेषु प्रवृत्ताः दरीदृश्यन्ते । ऋते मनसः एकमपीन्द्रियं निजकृत्यं न सुचारू करोति । अस्मादेव कारणात् यजुर्वेद इत्युक्तं-यस्मात्र ऋते किंचन कर्म क्रियते केनापि प्राणिना । तथा चायं मन्त्रः-

यत्प्रज्ञानमुत चेतो धृतिश्च यज्जोतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिव संकल्पमस्तु ।।

अतः मन एव तज्ज्योतिः येन ज्योतिषा द्योतते सर्वं व्यावहारिकं कृत्यम् । नैतावदेव अपितु आत्मज्ञानप्राप्तिरपि अनेनैव मनसा प्राप्तुं शक्यते इति कठोपनिषद्वचनम् - **''मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन**'' अर्थात् मनसैवात्माानावाप्रिरर्हा नान्यः पन्था ।

यन्मनः वैदिकदृष्टया-ज्योतिषां ज्योतिः। यदूपूर्वम् , येनेदं भूतं भुवनं, भविष्यत्परिगृहीतम् , येन यज्ञस्तायते, यस्मिन्नृचः सामयजूंषि प्रतिष्ठिताः, ययदजिरम् , ह्रत्प्रतिष्ठम् , तन्मनः शिवसंकल्पयुक्तं स्यादित्याभीक्ष्ण्यं प्रार्थ्यते वेदे । मन एव ब्रह्म इत्युक्त्वा उपनिषद मनसः महिमानं वरीवृध्यते, अपि तथा-

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।

इहोच्यते यत् ब्रह्म मनसा न ज्ञातुं शक्यते परं येन ब्रह्मणा मनः मतम् , ज्ञायते (यतोहि ब्रह्मकृपयैव मनमेतत् पुस्काररूपम् , तेनैवाशिषा च मनः वशीकर्त्तुं शक्यते । तदब्रह्म विदिध, अर्थात् येनमनसा

---

[1] मैत्रा०उ० ४/३०

अनुरंजिका शोध पत्रिका वर्ष 4 अंक 14 जनवरी-मार्च 2018/ISSN 2394-5540

परब्रह्मप्राप्तिरतिदुस्तरा परं ब्रह्मानेन मनसः ज्ञानं सुलभम् अतसतन्मन एव वस्तुतः ब्रह्म विद्यते । मनसः भूयः प्रतिष्ठित्वात् ब्रह्मणः कृते "मनस् " इत्यभिधेयम्प्रयुङ्क्ते ऋषिभिः- **मनसोऽपि मन इति ये विदुः ते निश्चयेन ज्ञातवन्तो ब्रह्म** [1] ।

तथाभिप्रायं यत् ब्रह्म मनसामपि मनः, मन एव वै विद्यते । अतस्सः मनसैवाप्तव्यं वर्त्तते । मनसैव परमार्थज्ञानसंस्कृतेन आचार्योपदेशपर्वकं चानद्रष्टव्यम। अपि च परो वक्ति बहदारण्यकोपनिषदिः मनोमयो मनः प्रायो मनस्युपलभ्यमानत्वात् । मनसा चोपलभत इति मनोमयोऽयं पुरूषः (बृ० ५/६/१) इतीह सुस्पष्टम् । छान्दोग्योपनिषदि च उच्यते- **"मनोमय ईश्वरः मनो ब्रह्म इत्युपासीत इत्यध्यात्मम्** "मन एव ब्रह्म विद्यते इति मत्वा उपास्यते चेत् अध्यात्मदृष्टिरसौ ।

दशस्विन्द्रियेष्वन्यतमं मन एकादश इन्द्रिय उच्यते । **'संकल्पविकल्पात्मकं मनः** 'लक्षणेन ज्ञायते मनः न किमपि निश्चयात्मकं कर्त्तु समर्थ्यते । निश्चयात्मिका तु बुद्धिर्भवति तथापि बुद्धिस्तु सारथिः पुनरपि मनः प्रग्रहं विना तस्य सारथेरसारथित्वम् । अत एव कठोपनिषद एतदाह-

यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टश्वा इव सारथेः ।
यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ।

रथनिष्यन्दना अश्वैरेव क्रियते परञ्चाश्वास्ते कतस्मिश्च स्थाने प्रापणीया इति तस्य विज्ञानवतः सारथेः सामर्थ्यम् यस्य इन्द्रियाणि वश्यानि मनसा युक्तेन भवन्ति, यस्य चेन्द्रियाणि अवश्यानि मनसाऽयुक्तेन भवन्ति सोऽविज्ञानवान् भवन्नसत् सारथिः, न च सत्सारथिः, तस्य चाश्वाः दुष्टाः न सदश्वा इव बोभुवति । एवञ्च धीर्यस्य मन-आदिविवेकाद्धीना संयमहीना वरीवृतीति सोऽमनस्कः ब्रह्मरूपि परमं पदमपि नाधिगन्तुं पारयति-

यस्त्वविज्ञानवान् भवत्यमनस्क; सदाशुचिः ।
न स तत्पदमाप्नोति संसारञ्चाधिगच्छति ।।
यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्मात् भूयो न जायते ।।

एतदनु स एव ब्रह्मवेत्ता, परब्रह्मज्ञाता, तदब्रह्मध्येता, यः समनस्कः भवति, मनः वशीकृत्य तिष्ठति मनसो निग्रहेण सदाशचिर्वर्तते । अतश्च विज्ञानवान्नस्ति मोक्षाय कैवल्याय चार्हो विद्यते सः संसारं नाधिगच्छति, भूयो-भूयो न जायते, तस्मादुपनिषदोच्यते मनः प्रग्रहवान् भूत्वा यः विज्ञानसारथिः नरः, सैव संसारतः परं तद्विष्णों परमं पदमाप्नोति । कारणाच्चैतस्मादेव "परं मनः" "बलवान् मनः" इत्येकत्र उपनिषदीया ऋक -

इन्द्रयेभ्यः पराह्यर्थी अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः ।। [2]

इह परशब्दस्य प्रयोगः बलवत्यर्थे विद्यते । मनः इन्द्रियेभ्यः प्रबलम् । यद्यपि मनसः बुद्धेर्प्राबल्यम् बुद्धेश्चात्मनः पुनरपि मनसोऽपि प्राबल्यम्भवति तदैव तु बुद्धिरात्माऽपि तदवशीकर्त्तु न प्रभवति । अत असावुक्तिः प्रसिद्धा-'जितं जगत् केन? मनो हि येन' इति । एतदनु शरीरस्तु भौतिकः, इन्द्रियाण्यपि भौतिकजगत्सम्बद्धानि, परं तेषां शब्दस्पर्शरूपरसगन्धादिविषयाः सूक्ष्माः, मनश्चैतेभ्योऽपि सूक्ष्मम् । तस्मादेवेदं क्वापि गन्तुमागन्तुं प्रभवति । इदं मन एव, येन मननात् प्राणिनः- मानवः, मनुष्यः, मानुषः आदि-संज्ञाभिः व्यवहृताः भवन्ति, तथोक्तं छान्दोग्योपनिषदि- मनो मनुतेऽनेनेत्यन्तः करणमृ । मन एव अन्तःकरणम् येन मनुते मनः । अस्माकं देहः मनोवृत्तिभिः सञ्चालितो भवति । यथा मनश्चिन्तयति तत्तथा देहः विदधाति तथा चोपनिषद्-

"मनोमात्रं जगत् मनः कल्पितं जगत् "(छन्दो०) ।

---

[1] बृ० ४/४/१८
[2] कठो १/३/१०

ऐतरेयोपनिषद मनसः महिम्नः प्रश्नोत्तरपूर्वकमतिमनोहारि वर्णनं दृग्गोचरं भवति । तत्रथा- **कोऽयमात्मेति वयमुपास्महे । कतरः स आत्मा, येन वा वश्यति, येन वा शृणोति, येन वा गन्धानाजिघ्रति, येन वा वाचं व्याकरोति, येन वा स्वादु चास्वादु च जानति? यदेतद्धृदयं मनश्चैतत् । संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः, स्मृतिः संकल्पः, क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति ।**

पद्यमाध्यमेनासेन उपनिषदृषिः विचिकित्सति यत् आत्मा येन शृणोति, पश्यति, आजिघ्रति, वाचं व्याकरोति, स्वादु आस्वादु चावगच्छति। तत्तत्त्वं कतरमिति पुरस्समाधत्ते-निश्चितं तन्मन एव, अन्तः करणञ्चैव । तच्चैतन्मनः संज्ञानम-सम्यकज्ञानशक्तियतम् आज्ञानम-प्रेरणाशक्तियतम् विज्ञानम् -नानाज्ञानशक्तियुक्तम् , प्रज्ञानम् - सद्यः ज्ञानशक्तियुक्तम् , मेधा-धारणसामर्थ्ययुतम् दृष्टिः- दर्शनसामर्थ्यन्वितम् , धृतिः-धैर्ययुक्तम् , मतिः धीरन्वितम् , मनीषा मननयोग्यम् , जूतिः-वेगशालि, स्मितिः-स्मरणशीलम् संकल्पम् -संकल्पस्वभावम् क्रतुः-मनोरथाचारम् , असुः-प्राणशक्तियुतम् कामः-कामनाशक्तियुक्तम् , वशः- स्त्रीसंसर्गाद्यभिलाषायुतम् विद्यते अतः एतानि सर्वाणि अभिधेयानि मनसः विद्यन्ते । अपि च शुक्लयजुर्वेदे यज्जाग्रतो० इत्यादिषु षट् -मन्त्रेषु मनसः कृते दैवमनः, यक्षमनः, प्रज्ञानमनः, चेतस्मनः, इत्यादिशब्दान् प्रयुज्य मनसः माहात्म्यं वर्णितमस्ति ।

छान्दोग्योपनिषत्कारः मनुते यत् यद्यपि संकल्पनपं मनसः लक्षणम् , परं संकल्पादपि श्रेष्ठं मन एव- **वित्तं वाव संकल्पाद्भूयो यदा वै चेतयतेऽथ संकल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति, मन्त्रेषु कर्माणि ।** तात्पर्यमस्य यत् चित्तम् अर्थात् मनः संकल्पादति भूयः श्रेष्ठम् , यतोहि यदा पुरूषः मननं करोति तस्य मनः गतिशीलं चिन्तनशीलञ्च भवति, तदैव संकल्पं क्रियते तेन, गिरञ्च प्रेरयति । एवञ्च प्रथमतः स्फुरणं मनस्येव बोभूयते । अत एवोक्तम् - वाङ् मे मनसि प्रतिष्ठितम् । "मनसा हि कामान् कामयते इति बृहादारण्यकोपनिषद् (३/२/७) ।

अस्माकमयं प्राणशरीरोऽपि मनोमय इति छान्दोग्योपनिषद्युक्तम् -मनोमयो मनः प्रायः, मनुतेऽनेनेति मनस्तत्स्ववृत्त्या विषयेषु प्रवृत्तं भवति, तेन तन्मयः, तथा प्रवृत्त इव तत्प्रायो निवृत्त इव । मनसा एव प्राणशरीरः क्वचित् प्रवृत्तो, वा भवति अतोऽयं शरीरोऽपि मनोमय एव खलु ।

मनसश्श्रेष्ठत्वं वर्णयतोपनिषदा प्रोच्यते-

मनो वाव वाचो भूयो यथा वै द्वै वामलके द्वे वा कोले द्वौ वाक्षौ मुष्टिरनुभवत्येवं वाचं च नाम च मनोऽनुभवति स यदा मनसा मनस्यति मन्त्रानधीयीयेत्यथाधीते कर्माणि कुर्वीयेत्यथ कुरूते पत्रांश्च पशंश्च हि लोको मनो हि ब्रह्म मन उपास्स्वेति ।।[1]

मन एव वचसः श्रेष्ठम् । यदा विचार्यते "मन्त्रपाठं करवाणि" इति तदा पाठः क्रियते, 'कर्माणि कुर्वीय" इति विचारिते सति कर्म क्रियते । मनस एव कृत्स्नक्रियात्वात् मनो हि आत्मा, मनो वै लोकः मनश्च हि खलु ब्रह्म, ततः हे मनुष्य ! मन एव उपास्व इति तत्रावोचत् । इत्थं यः मनो ब्रह्म इति विचार्य ब्रह्म उपास्ते चेत् यावन्मानसगतिः. तावत्स्वेंच्छागतिर्भवति तस्य।

एवामस्माभिर्परिदृश्यते, ज्ञाये च यन्मन एव सर्वकरणप्रवृत्तीनां प्राथम्यात् मन एव संसारः, मनस्येव सर्वं सुस्थितं, मन एवात्मा परमात्मा च । सर्वत्र मनसः योगदानम् , अत एव तस्य महत्त्वं, श्रेष्ठत्वं प्रेष्ठत्वं, वेदोपनिषत्सु गीतम् । एतस्य मनसः महिमानं भूमो श्रावम् -श्रावम् कोऽस्य निर्माता, कर्त्ता, धर्त्ता, सञ्चालकः इति ऋषिषु, मनीषिषु, पिपृच्छिषैषा समजायत-

केनेषितं पतति प्रेषितं मनः ।

* * *

[1] छ० ७/३/१